National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2026; 1(64): 165-169
© 2026 NJHSR
www.sanskritarticle.com

**डा. मिलनमाजी**
अतिथि-अध्यापकः,
संस्कृतव्याकरणविभागः,
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-
विश्वविद्यालयः, असम - 781337

**Correspondence:**
**डा. मिलनमाजी**
अतिथि-अध्यापकः,
संस्कृतव्याकरणविभागः,
कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-
विश्वविद्यालयः, असम - 781337

# भारतीयज्ञानपरम्परायां संस्कृतभाषाविज्ञानस्य तथा व्याकरणस्य योगदानम्।

**डा. मिलनमाजी**

भारतीयसंस्कृतेः प्राचीनकालादारभ्यः भाषायाः विशेषतः संस्कृतभाषायाः संरक्षणे संवर्धने च अद्वितीयं योगदानं दृश्यते। विश्वे यत्र कुत्रापि भाषाविज्ञानस्य व्यवस्थितरूपेण विकासः कृतः, तत्र भारतस्य प्राचीनविद्वद्भिः प्रदत्तः भाषासंस्कारः आद्यत्वेन निर्दिश्यते। भाषाविज्ञानम् इति शास्त्रं केवलं ध्वन्यात्मकव्याकरणमात्रं न, किन्तु तस्यां भाषायां निहितं वैचारिकं, दार्शनिकं, सांस्कृतिकं च आयामं सम्यक् अधिगन्तुं साधनं भवति। भारते भाषाविज्ञानस्य विकासः वेदकालपर्यन्तं नीतः अस्ति। वेदेषु यत् मन्त्रपाठः, स्वरविन्यासः, उच्चारणशुद्धिः च अनिवार्या आसीत्, तस्मात् ध्वनिविज्ञानस्य, शब्दरचनाविज्ञानस्य, अर्थविज्ञानस्य च प्रथमतः बीजानि रोपितानि। “श्रुतिः” इत्यस्य नामधेयेन वेदानां श्रवणप्रधानता व्यक्ता, यस्मात् वेदपाठे ध्वनिशुद्धिः, स्वरसंरक्षणं, परम्परानुक्रमेण अविच्छिन्नपरंपरा इत्यादीनां प्रति विशेषचिन्ता कृता। एषः एव भाषावैज्ञानिकचिन्तनस्य आधारशिला। तत्पश्चात् पाणिनिः महर्षिः, यः “व्याकरणमहर्षिः” इत्यभिधीयते, “अष्टाध्यायी” नाम व्याकरणमहाग्रन्थं रचयामासः। अनेन ग्रन्थेन भाषावैज्ञानिकक्षेत्रे नवदिग्दर्शनं प्रादर्शितम्। पाणिनिना सूत्ररूपेण व्याकरणविधयः स्थापिताः, याः केवलं संस्कृतस्य प्रयोगनियमनाय न अपितु भाषासंरक्षणाय, शब्दनिरुक्तेः अर्थस्फुटीकरणस्य च साधनरूपेण व्यवहृताः। पाणिनीयव्याकरणम् इत्येतत् शास्त्रम् आधुनिकभाषाविज्ञानस्य आद्यरूपं मन्यते। पाणिन्याः परं व्याकरणपरम्परा महर्षिपतञ्जलिना महाभाष्ये विस्तृता। पतञ्जलेः व्याकरणं न केवलं शब्दनियमसमुच्चयः इति मन्यते, किन्तु संस्कृतभाषायाः शुद्धिपरिपालनस्य, साहित्यनिर्माणस्य, तथा सांस्कृतिकसंवर्धनस्य मुख्यं साधनं इति प्रतिपादयति। व्याकरणस्य संरक्षणेन संस्कृतभाषा सहस्रवर्षाणि यावत् अपरिवर्तिता अवस्थितवती। भारतीयभाषाविज्ञानस्य अपरं विशेषं योगदानं ध्वनिविज्ञानक्षेत्रे दृश्यते। शौनकप्रणीतं प्रातिशाख्यग्रन्थाः वेदपाठस्य ध्वनिनियमं, स्वरस्थानं, सन्धिप्रक्रियाः च विवृण्वन्ति। एषु ग्रन्थेषु ध्वनिविज्ञानस्य तात्त्विकं विवेचनं, उच्चारणविज्ञानं, वर्णमाला-व्यवस्था च विस्तरेण उपलभ्यते। एतेषु ध्वनिशास्त्रीयचिन्तनं तावत् उन्नतं यत्, अद्यापि आधुनिकभाषाविज्ञानाः तेषां विचारानां गाम्भीर्ये विस्मयं विन्दन्ति। तथा निरुक्तं यास्कमुनिना विरचितं भाषाविज्ञानस्य अनिवार्यं स्तम्भरूपेण स्थितम्। शब्दानां मूलरूपपरिचयः, व्युत्पत्तिः, अर्थनिर्णयः, तात्त्विकार्थचिन्तनं च निरुक्ते प्रदर्शितमिति। तस्मात् भाषाविज्ञानं केवलं ध्वनिरूपेन न समाप्तिः अपितु शब्दार्थविज्ञानपर्यन्तं विस्तीर्णा परम्परा। एवं भाषाविज्ञानं, व्याकरणं च प्राचीनभारते न केवलं विद्यानिष्ठायै, अपितु सांस्कृतिकसमाजस्य स्थैर्याय, ज्ञानपरम्परायाः संरक्षणाय, आध्यात्मिकचिन्तनाय च महत्त्वपूर्णं योगदानं दत्तम्। संस्कृतं तावत् तादृशं व्याकरणशास्त्रं प्राप्तं यत् तस्याः स्थैर्येण भारतस्य दार्शनिकं, साहित्यिकं, वैज्ञानिकं च सम्पूर्णं वैभवम् अच्युतम् अभवत्। अस्मिन् प्रसङ्गे भाषाविज्ञानव्याकरणयोः मध्ये प्राचीनभारतस्य योगदानं विविधानां दृष्टीकोणानां परिप्रेक्ष्येण विचिन्तयिष्यते।

**कूटशब्दाः-** भाषाविज्ञानम्, व्याकरणशास्त्रम्, भाषाशिक्षणपद्धतिः।

❖ **भाषाविज्ञानस्य ऐतिहासिकपृष्ठभूमिः—** भारते भाषाशास्त्रस्य इतिहासः अतीव प्राचीनः, गम्भीरः, चिरस्थायी च अस्ति। प्राचीनभारतीयाः भाषायाः केवलं व्यवहारिकं रूपं न पश्यन्ति स्म, अपितु तस्य दार्शनिकं, व्याकरणिकं, वैज्ञानिकं च स्वरूपं विवेचयन्तः तं स्वयम् अध्ययनस्य, चिन्तनस्य, संस्कारस्य च प्रधानं क्षेत्रं कृतवन्तः। भाषायाः इतिहासे भारतस्य योगदानं विशेषतया विश्वे अद्वितीयं मन्यते। यथा-

**१. वेदकालीन-भाषाविज्ञानस्य प्रारम्भः-** भारतीय भाषाविज्ञानस्य आद्यः स्रोतः वेदः। वेदानां रक्षणार्थं पाठपरम्परा एव प्रमुखा साधना बभूव। संहितापाठः, पदपाठः, क्रमपाठः, जटा, घना इत्यादयः पाठभेदाः केवलं स्मरणरक्षणाय न, अपि तु ध्वन्यनुशासनस्य, शब्दविभाजनस्य, स्वरचिन्तनस्य च आधारभूताः आसन्। एषा प्रक्रिया भाषावैज्ञानिकचिन्तनस्य आदिचरणं प्रतिपादयति। षट्सु वेदाङ्गेषु "शिक्षा" ध्वनिशास्त्रं, "छन्दः" मात्रागणनापद्धतिः, "निरुक्तम्" शब्दव्युत्पत्तिविचारः, "व्याकरणम्" शब्दरचनानियमः इत्येतानि भाषाविज्ञानस्य प्राचीनतमं स्वरूपं द्योतयन्ति। अत्र शिक्षाशास्त्रे वर्णानां उच्चारणविधिः, स्थानं, प्रयत्नः, दीर्घता, ह्रस्वता इत्यादयः विषदतया निरूपिताः।

**२. निरुक्त-शब्दानां व्युत्पत्तिविचारः-** यास्कमुनिना विरचितं "निरुक्तं" भाषाविज्ञानस्य ऐतिहासिकपृष्ठभूमौ अत्यन्तं प्रासंगिकं ग्रन्थः। अस्मिन् ग्रन्थे शब्दस्य मूलं, व्युत्पत्तिः, प्रयोजनं च विवेच्यते। यास्कमुनिः प्रतिपादयति – शब्दः केवलं ध्वनिरूपः न, अपि तु तस्मिन् अर्थग्रहणशक्तिः उत्पन्ना भवति। भाषायाः अर्थशक्तिः, शब्दस्य स्वभावः, लौकिक-वैदिकभेदः, पर्यायविचारः च अत्र विवेचितः।

**३. व्याकरणशास्त्रस्य विकासः-** भारतीय भाषाविज्ञानस्य ऐतिहासिकपृष्ठभूमौ व्याकरणस्य विशेषं स्थानं वर्तते। पाणिनिमुनिना (ई.पू. ५–४ शताब्द्यां) रचितः "अष्टाध्यायी" इति व्याकरणग्रन्थः विश्वे भाषाविज्ञानस्य शिखररूपेण स्वीकृतः। अष्टाध्यायी केवलं संस्कृतस्य व्याकरणं न, अपि तु एकः सूत्रप्रधानः, वैज्ञानिकः, व्यवस्थितः, रूपान्तरप्रक्रियायुक्तः भाषावैज्ञानिकप्रतिकृतिः इत्योऽपि मन्यते। पाणिनीयसूत्राणि संक्षिप्तानि, परन्तु अत्यन्तं गूढानि। धातुपाठः, गणपाठः, धातुविकरणनियमाः, प्रत्ययप्रक्रिया – इत्येतानि पाणिनीयव्यवस्थायां सूक्ष्मतया निरूपितानि। तेन भाषाशास्त्रं केवलं व्यवहारिकं साधनं न, अपि तु दार्शनिकं, विश्लेषणात्मकं च भवन्ति।

**४. पाणिन्यनन्तरग्रन्थकाराः-** पाणिनेरनन्तरं व्याकरणपरम्परा न केवलं जीविता, अपि तु विस्तीर्णा अपि जाता। कात्यायनः "वार्तिककारः", पतञ्जलिः "महाभाष्यकारः" इत्येतयोः कार्ये पाणिनीयसूत्राणां स्पष्टीकरणं, परिशोधनं, तर्कात्मकं विवेचनं च दत्तम्। महाभाष्ये केवलं व्याकरणं न, अपि तु भाषायां दार्शनिकं स्वरूपं, तत्त्वमीमांसा, वाक्यार्थविचारः च सुस्पष्टं निरूपितः।

तत्पश्चात् भर्तृहरिः (५–६ शताब्दी ई.) "वाक्यपदीयम्" इत्यस्मिन् ग्रन्थे भाषादर्शनस्य उच्चतरं आयामं प्रकटयति। अस्य प्रमुखं सिद्धान्तं– "शब्दब्रह्मवादः"। भाषैव ब्रह्म, सर्ववस्तूनां स्वरूपं शब्दरूपेण व्यवह्रियते। वाक्यं, पदं, ध्वनिः, अर्थः– एतेषां सम्बन्धः अत्र गम्भीरतया विवेचितः।

**५. ध्वनिशास्त्रं शिक्षाशास्त्रं च-** भारतीय भाषाविज्ञानस्य पृष्ठभूमौ ध्वनिशास्त्रस्य अपि विशिष्टं योगदानम् अस्ति। प्राचीनभारते वर्णोच्चारणस्य सूक्ष्मता, स्वरविचारः, यथायोग्यप्रयत्नविचारः च परिशुद्धतया निरूपिताः। तैत्तिरीयप्रातिशाख्ये, ऋग्वेदप्रातिशाख्ये, अथर्ववेदप्रातिशाख्ये च वर्णानुशासनं लभ्यते। एते ग्रन्थाः ध्वनिविज्ञानस्य आधारभूताः मन्यन्ते।

**६. छन्दःशास्त्रमात्रागणनानाम् आधारः-** भारतीयभाषाविज्ञानस्य पृष्ठभूमौ छन्दशास्त्रमपि महत्त्वपूर्णं स्थानं धारयति। पिङ्गलाचार्येण विरचितं "छन्दशास्त्रम्", वर्णमात्रानां गणना, लघु-गुरुभेदः, छन्दोविन्यासः इत्यादीनां विषये स्पष्टं विवेचनं करोति। आधुनिकभाषाविज्ञाने मात्रिकाविश्लेषणस्य आदर्शः अत्र द्रष्टुं शक्यते।

**७. दार्शनिकविचारः भाषायाः-** भारतीयदर्शनप्रणालिषु भाषायाः दार्शनिकं विवेचनं अपि बहु विस्तीर्णमस्ति। मीमांसकाः शब्दस्य अपौरुषेयत्वं, नित्यत्वं च प्रतिपादयन्ति। बौद्धाः शब्दस्य क्षणिकत्वं, संज्ञारूपत्वं च वर्णयन्ति। न्याय-वैशेषिकाः शब्दं ज्ञानप्रकाशकं साधनं मन्यन्ते। अयं दार्शनिकविचारः भाषाविज्ञानस्य ऐतिहासिकभूमौ गहनं योगदानं दत्तम्।

**८. विश्वे भारतीयभाषाविज्ञानव्याकरणयोः योगदानम्-** भारतीय भाषाविज्ञानस्य इतिहासः केवलं देशीयसीमायां न स्थितः, अपि तु पश्चिमे अपि तस्य प्रभावः परिलक्षितः। उनविंशतितमे शताब्दे पाश्चात्यभाषावैज्ञानिकाः पाणिनीयव्याकरणम् अध्ययनं कृत्वा तुलनात्मकभाषाशास्त्रे नूतनमार्गं विकसितवन्तः। एवं प्राचीनभारते भाषाविज्ञानं व्याकरणं च ऐतिहासिकपृष्ठभूमौ अत्यन्तं गूढं, गम्भीरं, चिरस्थायी च अस्ति। वेदकालीनपाठपरम्परा, वेदाङ्गानि, निरुक्तं, प्रातिशाख्यग्रन्थाः, पाणिनीयव्याकरणं, महाभाष्यं, वाक्यपदीयं, छन्दशास्त्रं एते सर्वे ग्रन्थाः एवं परम्पराः भारतस्य भाषाशास्त्रं विश्वे अद्वितीयं कृतवन्तः। अतः भाषाविज्ञानस्य ऐतिहासिकपृष्ठभूमिः भारतदेशे न केवलं भाषाशास्त्रस्य इतिहासः, अपि तु तस्य सांस्कृतिकम्, दार्शनिकम्, वैज्ञानिकं च धरोहरं प्रतिपादयति।

❖ **व्याकरणपरम्परा-** भारतीयव्याकरणपरम्परा सर्वतोन्मुख्या, वैज्ञानिकदृष्ट्या अत्याधुनिकेभ्यः पश्चिमदेशीयैः सिद्धान्तेभ्यः अपि प्राचीनतमा च अस्ति। विश्वेऽपि अद्वितीयः च। मानवसंस्कृतेः आदिकालातदेव भाषा मनुष्यजीवनस्य मूलाधारा आसीत्। विशेषतः

वैदिकपरम्परायां, मन्त्राणां शुद्धोच्चारणं, यथार्थार्थग्राहकता च, भाषाशास्त्रस्य, व्याकरणस्य च विकासाय मुख्यकारणं जातम्। तस्मात् प्राचीनभारते भाषाविज्ञानं केवलं शब्दविज्ञानरूपेण नासीत्, अपि तु सांस्कृतिक-दार्शनिक-वाङ्मयपरम्परायाः आधारभूतं शास्त्रं जातम्।

**१. वैदिकपरम्परायाः प्रारम्भः-** भारतीयव्याकरणपरम्परा वेदानां संरक्षणे आरब्धा। वेदानां शुद्धपाठः, स्वरविन्यासः, क्रमः, अनुक्रमः इत्यादिकं रक्षितुं “शिक्षा”, “छन्दः”, “निरुक्तं”, “व्याकरणं” च वेदाङ्गानि निरूपितानि। तत्र शिक्षाशास्त्रे वर्णप्रयोगः, छन्दःशास्त्रे छन्दोनिर्णयः, निरुक्ते शब्दार्थविवेचनं, व्याकरणे तु शब्दरचना-सिद्धान्ताः प्रतिपादिताः। अयं चतुर्विधः भाषाशास्त्रीयाधारः प्राचीनभारते भाषाविज्ञानस्य मूलं बभूव।

**२. पाणिनीयव्याकरणम्-** व्याकरणपरम्परायाः शिखरं “पाणिनिः”। सः अष्टाध्यायीनामकं व्याकरणमहाग्रन्थं रचितवान्। अस्मिन् ग्रन्थे प्रायः३९५९ सूत्राणि वर्तन्ते, यैः सम्पूर्णा संस्कृतभाषा सूक्ष्मतया व्यवस्थितिः क्रियते। पाणिनेर्योगदानं विश्वव्याकरणेतिहासे अद्वितीयम्। तेन व्याकरणं केवलं नियमसमूहः न, अपि तु यन्त्रवत् कार्यशीलः प्रणालीरूपेण स्थाप्यते। अष्टाध्यायी व्याकरणं गणितसदृशं, सूत्रप्रधानं, अत्यल्पशब्दैः विस्तीर्णार्थप्रतिपादकम्।

**३. पाणिन्यनन्तरपरम्परा -** पाणिनेरनन्तरं व्याकरणपरम्परायां बहवः आचार्याः अभवन्। तत्र कतिपयः प्रमुखाः–

- **कात्यायनः (वार्तिककारः)** – पाणिनिसूत्राणां स्पष्टीकरणार्थं वार्तिकानि रचितानि।
- **पतञ्जलिः (महाभाष्यकारः)** – अष्टाध्यायी, वार्तिकानि च आधारीकृत्य महाभाष्यं नाम महान् ग्रन्थः लिखितः। अस्मिन् ग्रन्थे व्याकरणस्य दार्शनिकं, भाषाशास्त्रीयं च स्वरूपं गम्भीरतया विवृणोति।
- **भर्तृहरिः** – वाक्यपदीयग्रन्थस्य कर्त्ता। अस्य दार्शनिकविचाराः, विशेषतः “शब्दब्रह्मवादः”, भाषातत्त्वविचारे गहनं स्थानं धारयति।

**४. अन्ये व्याकरणाचार्याः-** भारते व्याकरणपरम्परा केवलं पाणिना सीमिता नासीत्। अन्येऽपि व्याकरणाचार्याः अस्मिन् क्षेत्रे योगदानं दत्तवन्तः–

- **कातन्त्रव्याकरणम्** – आर्यनन्दिना रचितं, सरलरूपेण व्याकरणशिक्षणाय उपयुक्तम्।
- **जैनव्याकरणम्** – जिनेन्द्रबुद्धिना रचितं, जैनपरम्परायां प्रसिद्धम्।
- **हेमचन्द्राचार्यः** – जैनाचार्यः, यस्य व्याकरणग्रन्थः अपि सुप्रसिद्धः।

एतेषां सर्वेषां योगदानात् संस्कृतव्याकरणम् अत्यन्तं समृद्धं जातम्।

**५. भाषाविज्ञानस्य वैशिष्ट्यम्**– भारतीयव्याकरणपरम्परायाः वैशिष्ट्यं विश्वेऽपि अद्वितीयम्–

➢शब्दस्य धात्वन्वयेन विवेचनम्।
➢रूपविचारः (प्रत्ययः, उपसर्गः, विकरणादि)।
➢ध्वनिशास्त्रीयविश्लेषणम्।
➢वाक्ये पदानां पारस्परिकसम्बन्धः।
➢शब्दस्य *metaphysical* स्वरूपं (भर्तृहरिः – “शब्दो नित्यः”)।

एतेषां विचाराणां आधारे एव आधुनिकभाषाविज्ञानस्य कतिपयः सिद्धान्ताः उपजाताः।

**भाषावैज्ञानिकदृष्टिः—** भारतीयपरम्परायां भाषा केवलं संप्रेषणस्य साधनं न, अपि तु संस्कृतिस्थैर्यस्य, ज्ञानवितरणस्य, दार्शनिकचिन्तनस्य च मुख्यम् आधारम्। तस्मात् प्राचीनभारतीयैः भाषायाः विविधानि पक्षाणि सूक्ष्मतया विवेचितानि। आधुनिकभाषाविज्ञानस्य प्रमुखशाखा अपि वर्तन्ते। यथा- ध्वनिशास्त्रम्, रूपशास्त्रम्, वाक्यविन्यासः, शब्दार्थविज्ञानम्, प्रयोगशास्त्रमिति एतानि सर्वाणि प्राचीनव्याकरणपरम्परायामेव सुसंस्कृतानि। एतेषां संक्षिप्तविस्तृतं विवेचनं निम्नलिखितम्–

**ध्वनिशास्त्रम् (Phonetics)**– ध्वनिशास्त्रे शिक्षाग्रन्थाः प्रमुखस्थानं धारयन्ति। तत्र वर्णानाम् उच्चारणस्थानानि (कण्ठः, तालुः, मूर्धा, दन्ताः, ओष्ठाः), प्रयत्नः (स्पृष्टः, ईषत्स्पृष्टः, विवृतः इत्यादयः), स्वरवर्णेषु ह्रस्वदीर्घप्लुतभेदाः, मात्रानिर्णयः, अनुस्वारानुस्वारिणोः विवेचनम् इत्यादयः सूक्ष्मतया निर्दिष्टाः। यथा-तैत्तिरीयप्रातिशाख्ये तथा ऋग्वेदीय प्रातिशाख्ये अपि वर्णानां उत्पादनविधिः प्रतिपादितः। आधुनिकध्वनिविज्ञानस्य IPA (International Phonetic Alphabet) प्रणाली यथावत् एषां शिक्षाग्रन्थानामधिष्ठानेन स्पष्टीकृतव्या इति विद्वद्भिः स्वीक्रियते।

**२. रूपशास्त्रम् (Morphology)**– भारतीयव्याकरणे विशेषतः पाणिनीयव्यवस्थायां रूपशास्त्रं सर्वतोऽधिकं विकसितम्। पाणिनेरष्टा-ध्यायी व्याकरणशास्त्रस्य अद्वितीयः ग्रन्थः। यत्र धातवः, प्रत्ययाः, तद्धिताः, समासाः, कृत्प्रत्ययाः च नियमानुसारं संगृहीताः। उदाहरणार्थम्–

➢धातुपाठे २००० अधिकाः धातवः निर्दिष्टाः।
➢तद्धितप्रकरणे शब्दनिर्माणस्य सामाजिक-सांस्कृतिक-पृष्ठभूमिः प्रकटिता।
➢समाससूत्रेषु संज्ञा, समासः, तत्पुरुषः, द्वन्द्वः, बहुव्रीहिः इत्यादीनां विवेचनम् अस्ति।

आधुनिकं रूपशास्त्रम् (Morphology) यत् “morpheme” इति मूलरूपं स्वीकृत्य प्रत्ययानां कार्यं विश्लेषयति, तत् पाणिनीयव्यवस्थायां पूर्वमेव सूक्ष्मतया प्रतिपादितम्।

**३.वाक्यविन्यासः(Syntax)–** भारतीयपरम्परायां वाक्यस्य ऐक्यविशेषं विवेचनविषयमिति। पाणिनिः नियमावलीरूपेण पदविन्यासस्य आधारं दत्तवान्, किन्तु भार्तृहरिना तु वाक्यपदीये गभीरतरं दार्शनिकं विश्लेषणं करोति। सः "स्फोटवादम्" प्रतिपाद्य वदति— शब्दः न केवलं ध्वनिसमूहः, अपि तु एकेन स्फोटेन तात्त्विकार्थः अवगम्यते। वाक्ये पदानां सम्बन्धः, कर्ता-कर्म-क्रियायाः परस्परानुरूपता च विवेचिता। एवं प्राचीनभारतीयवाक्यविज्ञानम् आधुनिक "Syntax" इति शास्त्रस्य "Phrase structure grammar" इत्यादिभ्यः पूर्वं स्वीयतया उन्नतम्।

**४. शब्दार्थविज्ञानम् (Semantics)** शब्दस्य तात्त्विकविवेचनं प्राचीनभारते निरुक्ते च वाक्यपदीये च दृश्यते।

- **यास्काचार्यः** निरुक्तेशब्दानां मूलव्युत्पत्तिम्, अर्थविस्तारं, पर्याय-पदानां भेदं, शब्दार्थसंबन्धं च प्रतिपादितवान्।
- **भार्तृहरिः**शब्दार्थयोः सम्बन्धं दार्शनिकदृष्ट्या विवेचयन् वदति— "शब्द एव अर्थः" इति। एते विचाराः आधुनिक semantics तथा lexicology शास्त्रयोः मूलभूताधाररूपेण स्वीकृताः।

**५. प्रयोगशास्त्रम् (Pragmatics)**प्राचीनभारतीयव्याकरणपरम्परायां केवलं नियमबद्धा भाषा न, अपि तु प्रयोगसन्दर्भस्यापि विवेचनं कृतम्।

- **पतञ्जलिमहाभाष्ये**सामाजिकसन्दर्भानुसारं शब्दार्थभेदाः, वाक्य-प्रयोगस्य यथार्थता, व्यवहारजन्यसौष्ठवम्, सन्दर्भाधीनता च निरूपिताः।
- यत्र प्रयुक्तः शब्दः प्रयोजनानुसारं विशेषार्थं बोधयति, तत्र प्रयोगशास्त्रस्य बीजम् द्रष्टव्यम्।

आधुनिकभाषाविज्ञाने यत् "pragmatics" शाखा अस्ति— सन्दर्भानुगुणतया अर्थबोधः—तस्य प्राचीनरूपं महाभाष्ये स्पष्टतया दृश्यते। एवं दृश्यते यत्, प्राचीनभारते भाषाविज्ञानं केवलं व्याकरणनियमनिर्माणे न निरुध्यते, अपि तु भाषायाः सर्वाङ्गीण-विवेचनम् अकरोत्। ध्वन्युत्पत्तेः प्रारभ्य शब्दार्थविवेचनं, वाक्य-संरचना, प्रयोगदृष्टिः च यथाक्रमं विस्तृताः। एषा परम्परा आधुनिकभाषाविज्ञानस्य बहुषु शाखासु प्रत्यक्षप्रेरणास्रोतः अभवत्।

**भारतीयचिन्तनस्य वैशिष्ट्यम्—** भारतीयव्याकरणे केवलं भाषायाः रूपपरम्परा न, अपि तु दार्शनिकं आधारं अपि दृश्यते। भाषायाः आद्यरूपं ब्रह्मस्वरूपं मन्यते—"वाक् ब्रह्म" इति। वेदेषु वाक्-देवीस्तुति, वाक्यपदीये स्फोटवादः, निरुक्ते शब्दब्रह्मवादः एतेषां सर्वेषां मूलं दार्शनिकचिन्तनमेव। यदा अष्टादशशतके युरोपदेशे भाषाविज्ञानं व्यवस्थितं रूपं प्राप्तम्, तदा मैक्समूलरादयः युरोपीयाः विद्वांसः पाणिनिसूत्राणि दृष्ट्वा विस्मिताः। पाणिनिः आधुनिककाले अपि सङ्गणकभाषाविज्ञानस्य (Computational Linguistics) आधारभूतं व्याकरणं प्रदत्तवान्। भारतीयव्याकरणपरम्परा केवलं प्राचीनविद्या न, अपि तु आज अपि कृत्रिमबुद्धेः (Artificial Intelligence), भाषा-प्रसंस्करणस्य (NLP) च क्षेत्रे अत्यन्तोपयोगिनी। भारतीयसंस्कृतेः महत्त्वपूर्णः अंशः भाषाशास्त्रं तथा व्याकरणपरम्परा वैदिककालात् आरभ्य प्राचीनभारते भाषाविज्ञानं केवलं शब्दप्रयोगे, वर्णव्यवस्थायाम् अथवा व्याकरणे सीमितं नासीत्, किन्तु तस्य दार्शनिकं, तात्त्विकं, सामाजिकं च परिमाणं विश्वे अप्रतिमम्। पाणिनीय-अष्टाध्यायी, यास्कस्य निरुक्तम्, पतञ्जलिमहाभाष्यम्, शिक्षाग्रन्थाः, छन्दशास्त्रं च एते सर्वे भाषावैज्ञानिकाधारभूताः। एतेषां ग्रन्थानां वादविवादाः, विश्लेषण-पद्धतयः, शब्दार्थविचारः च केवलं संस्कृतभाषायाः न, अपि तु विश्वस्य सम्पूर्णभाषाविज्ञानस्य आद्यं आधाररूपेण स्थिताः। अष्टाध्यायी इति पाणिनेरव्याकरणं अति-सूक्ष्मं, सङ्ग्राहकं, गणितवत् सूत्रात्मकं च अस्ति। एतत् न केवलं संस्कृतस्य व्यवस्थितं रूपं दत्तम्, अपि तु आधुनिकभाषाशास्त्रेषु "प्रजनक-व्याकरणम्" (Generative Grammar) इति पद्धतेः प्रेरणास्रोतः अपि जातम्।

**आधुनिककाले प्रभावः-** आधुनिकविज्ञानयुगे प्राचीनभारतीयभाषा-विज्ञानस्य प्रभावः बहुधा दृश्यते।

1. **भाषाशास्त्रीयपद्धतिषु प्रभावः** – आधुनिकपाश्चात्यविद्वांसः यथा फर्डिनाण्ड् डी सस्यूर (Saussure), नॉम चॉम्स्की (Noam Chomsky) इत्यादयः पाणिनीयव्याकरणे प्रेरणां प्राप्य भाषासिद्धान्तान् प्रतिपादयन्। चॉम्स्की-कृतः "जेनेरेटिव -ग्रामर" अस्मिन् विशेषं द्रष्टुं शक्यते।
2. **तर्कशास्त्र-गणिते प्रभावः** – पाणिनीयसूत्रपद्धतिः गणितीय-तर्कात्मकशास्त्रस्य पूर्वरूपं भवति। सूत्रात्मकशैली, संक्षेपेण जटिलविचारस्य प्रतिपादनम्, सङ्गणकभाषासूत्रस्य (Computer Programming Languages) आदर्शरूपेण गृहीतम्।
3. **आधुनिकभाषाशिक्षणम्** – ध्वनिशास्त्रे प्राचीनभारतीयैः यत् सूक्ष्मविवेचनं कृतं तत् आज्ञावानां ध्वनिविज्ञानविशारदानां कृते प्रेरकं जातम्। वर्णोच्चारणस्थानानि, मात्रा, स्वरविन्यासः इत्यादयः अद्यापि भाषाशिक्षणसंस्थानेषु प्रयोग्यन्ते।
4. **अनुवादशास्त्रे योगदानम्** – निरुक्ते यास्केन शब्दार्थस्य, व्युत्पत्तेः, सन्दर्भस्य विवेचनम् अत्यन्तं सूक्ष्मतया कृतम्। अस्य प्रभावः आधुनिकानुवादशास्त्रे अपि दृश्यते, यत्र सन्दर्भपरता (contextual meaning) इति तत्त्वं प्रमुखं गण्यते।

5. **डिजिटल-युगे योगदानम् –** वर्तमाने सङ्गणकभाषाविज्ञाने (Computational Linguistics), कृत्रिमबुद्धौ (Artificial Intelligence) च पाणिनीयव्याकरणं, संस्कृतवाक्यरचनापद्धतिः, सूत्रव्यवस्था च प्रयोग्यन्ते। संस्कृतस्य स्पष्टव्याकरणिकसंरचना यन्त्रद्वारा अनुकरणाय सरलम् अस्ति।

6. **सांस्कृतिकं दार्शनिकं च योगदानम् –** भाषा केवलं संप्रेषणस्य साधनं न, अपि तु तात्त्विकचिन्तनस्य दर्पणम्। भारतीयव्याकरणे 'शब्दः ब्रह्म' इति दृष्टिः वर्तते। अयं भावः आधुनिकमानविकीविज्ञानानां (Humanities) दार्शनिकचर्चासु अद्यापि प्रासंगिकः।

**निष्कर्षः-** प्राचीनभारतीयभाषाविज्ञानं व्याकरणं च केवलं ऐतिहासिकमूल्यमात्रं न वहतः अपि तु आधुनिकजगति अपि जीवन्प्रेरणादायकम् अस्ति। पाणिनेरष्टाध्यायी यथावत् अद्यापि भाषासिद्धान्तेषु आदर्शरूपेण गृहीता। शिक्षाग्रन्थेषु ध्वनिशास्त्रीय-विवेचनम् आज्ञावानां ध्वनिवैज्ञानिकानाञ्च कृते मार्गनिर्देशकमिति। निरुक्ते प्रतिपादितः शब्दार्थचिन्तनः आधुनिकभाषार्थविज्ञानस्य आधारः। प्रौद्योगिकयुगे तु संस्कृतभाषायाः संगणकीयप्रयोगः नूतनद्वाराणि उद्घाटयन्ति। पाणिनीयव्याकरणं यथावत् सङ्गणक-प्रोग्रामिङ्गे, कृत्रिमबुद्धौ, यन्त्रानुवादे च प्रयुज्यते। एतेन स्पष्टरूपेण दृश्यते यत्—प्राचीनभारतीयैः प्रतिपादिताः सिद्धान्ताः न केवलं तेषां कालाय प्रासंगिकाः आसन्, अपि तु अद्यतनवैज्ञानिक-सामाजिकपरिसरे अपि महत्त्वपूर्णं स्थानं धारयन्ति। अतः वक्तुं शक्यते—"भारतीयभाषाशास्त्रं विश्वस्य भाषाविज्ञानं प्रकाशयति, संस्कृतव्याकरणं च आधुनिकविज्ञानस्य आधारभूतं दीपस्तम्भवत् स्थितम्।"

**सन्दर्भग्रन्थाः-**


१. अग्रवाल, वासुदेव शरण, पाणिनि कालीन भारतवर्ष, मोतीलाल बनारसीदास नेपाली खपरा वनारस,१९५५
२. शास्त्री,श्रीचारुदेव, व्याकरण महाभाष्य, मोतीलाल बनारसीदास, वाराणसी, संवत् २०२५
३. मिश्रः,श्रीनारायणः, अष्टाध्यायीसूत्रपाठः, चौखम्बा-ओरिएण्टा-लिआ, वाराणसी, १९७७
४. श्याम सुन्दरदास, भाषा विज्ञान, इंडियन प्रेस लिमिटेड प्रयाग, १९८१
५. त्रिपाठी, ब्रह्मानन्द, व्याकरण शास्त्र का इतिहास, चौखम्बा सुरभारती प्रकाशन वाराणसी,१९८२
६. मिश्रः, श्रीरामशङ्करः, अष्टाध्यायीसूत्रपाठः, मोतिलाल-बनारसीदासः, वाराणसी, १९९७
७. मीमांसक, आचार्य श्रीयुधिष्ठिर, संस्कृत व्याकरण शास्त्रों का इतिहास, चौखम्बा पब्लिशर्स वाराणसी, १९९८
८. द्विवेदी, डा. कपिलदेवः, अर्थविज्ञान और व्याकरण दर्शन, विश्वविद्यालयः प्रकाशन्, वाराणसी, २०००